Shri Bala Shatakshari Mantra Vidhanam

# श्रीबालाशताक्षरीमन्त्र विधानम्

## Document Information

Text title : bAlAshatAkSharImantravidhAnam

File name : bAlAshatAkSharImantravidhAnam.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीबालाशताक्षरीमन्त्र विधानम्

अस्य श्री बालाशताक्षरीमहामन्त्रस्य । ब्रह्मा ऋषिः । गायत्री छन्दः ॥

बालात्रिपुरसुन्दरी देवता ।
ध्यानं -
हरिपुरन्दरप्रभृतिदेवतामकुटविस्फुरत्किरणभास्वरम् ।
नमत सन्ततं नमत सन्ततं त्रिपुरसुन्दरीचरणपङ्कजम् ॥

मूलमन्त्रः -
ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः वषट् सौः क्लीं श्रीं
वौषट् ऐं क्लीं श्रीं सौः क्लीं ऐं ॐ आं ह्रीं क्रों बालात्रिपुरसुन्दरि
प्रसन्नवाग्वादिनि आश्रावय आश्रावय । आकर्षय आकर्षय ।
आवाहय आवाहय । मां रक्ष रक्ष । सौभाग्यदायिनि स्वर्णाकर्षण-
महालक्ष्मि धनं देहि देहि सर्वजनं मे वशमानय स्वाहा ॥

शताक्षरी शतानन्दी शतायुष्यविवर्धिनी ।
शतकोटि धनं देहि शङ्करी शान्त रूपिणी ॥

(बाल शताक्षरी अधो निर्दिष्टाभिरष्टभिः ऋग्भिः
पृथग्योजिता जपे होमे च प्रशस्यते । क्रमस्त्वित्थम् -
१. हिरण्यवर्णां इत्यादि आवह -शताक्षरी ।
२. संसमिद्युवसे इत्यादि वसून्याभर -शताक्षरी ।
३. सङ्गच्छध्वं इत्यादि जानताम् -शताक्षरी ।
४. समानो मन्त्रः इत्यादि जुहोति -शताक्षरी ।
५. समानीव आकूतिः इत्यादि सुसहासति -शताक्षरी
६. श्रिये जातः इत्यादि मितद्रौ -शताक्षरी
७. इन्द्र श्रेश्ठानि इत्यादि त्वमह्याम् -शताक्षरी
८. प्रजापते इत्यादि रयीणां -शताक्षरी ।
ऋचो यथा -

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥

सं समिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।
इलस्पदे समिध्यसे स नो वसून्याभर ॥

सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् ।
देवा भागं यथा पूर्वे सञ्जानाना उपासते ॥

समानो मन्त्रः समितिः समानी समानं मनः
सह चित्तमेषाम् ।
समानं मन्त्रमभिमन्त्रये वः समानेन वो हविषा जुहोमि ॥

समानी व आकूतिस्समाना हृदयानि वः ।
समानमस्तु वो मनो यथा वः सुसहासति ॥

श्रिये जातः श्रिय आनिरियाय श्रियं वयोजरितृभ्यो
ददाति ।
श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या
समिथामितद्रौ ॥

इन्द्र श्रेष्ठानि द्रविणानि धेहि चित्तिं दक्षस्य
सुभगत्वमस्मे ।
पोषं रयीणामरिष्टिं तनूनां स्वाद्मानं
वाचः सुदिनत्वमह्नाम् ।
प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परिता बभूव ।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयँ स्याम पतयो रयीणाम् ॥

इति श्रीबालाशताक्षरीमन्त्रविधानं सम्पूर्णम् ।

Proofread by PSA Easwaran

*Shri Bala Shatakshari Mantra Vidhanam*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*